चेतनीया, स्त्री, (चित् + णिच् + अनीयर् टाप् च। यद्वा चेतनायै हिता इति छः।) ऋद्धिनामौषधिः। इति राजनिर्घण्टः॥

चेदिः, पुं, देशभेदः। तत्पर्य्यायः। चैपुरः २ डाहलः ३ चैद्यः ४। (अयं देशस्तु आग्नेय्यां दिशि शुक्तिमतीनदीतीरे स्थितः। यथा, वृहत्संहितायाम्। १४। ८।

"शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्द्ध्वकण्ठाश्च॥")

तद्देशस्थे पुं भूम्नि। इति हेमचन्द्रः॥

चेदिपतिः, पुं, (चेदिदेशस्य पतिः पालकः राजा।) उपरिचरवसुः। यथा,—

"इन्द्रप्रीत्यै चेदिपतिश्चकारेन्द्रमहञ्च सः।
पुत्त्राश्चास्य महावीर्य्याः पञ्चासन्नमितौजसः॥"
इति महाभारतम्॥

(शिशुपालः। यथा, महाभारते। २। ४०।१५।

"इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः।
भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत॥")

चेदिराजः, पुं, (चेदीनां राजा इति। "राजाहःसखिभ्यष्टच्।" इति टच्।) शिशुपालः। इति पुराणम्॥ (यथा, महाभारते। २। ४०। १२।

"विपुला चास्य दुर्बुद्धेर्बुद्धिर्बुद्धिमताम्बर!।
चेदिराजस्य कौन्तेय! सर्व्वेषाञ्च महीक्षिताम्॥")

उपरिचरवसुः। स तु चन्द्रवंशीयकृतिराजपुत्त्रो विष्णुभक्त इन्द्रसखा इन्द्रादेशाच्चेदिराज्यं गृहीतवान् इन्द्रदत्ताकाशगविमानेनोपरिचरो बभूव। एकदा ऋषयो देवाश्च विवदमानास्तमपृच्छन् किमोषध्या पशुना वा यज्ञाः कर्त्तव्यास्तेनोक्तं पशुना तत ऋषयस्तं शेपुर्भवता यथाशास्त्रमनुक्त्वा देवानां पक्षपातः कृतस्तस्मादधो गच्छ इत्यभिशप्तः स तत्क्षणात् भूविवरे गतः। श्रीविष्णुना तस्य भक्षणार्थं नान्दीश्राद्धादौ गृहभित्तौ घृतधारादानं विहितम्। इति महाभारतम्॥

चेदिराट्, [ज्] पुं, (चेदिषु राजते इति। राज + क्विप्। यद्वा चेदिषु राट्।) शिशुपालः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते।२।३८।३१।

"स वै पश्येद्यथा धर्म्मं न तथा चेदिराडयम्॥"

उपरिचरवसुः। दमघोषश्च। इति पुराणम्॥)

चैत्री, स्त्री, रागिणीविशेषः। इति हलायुधः॥

चेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सकञ्च-सेट्-ऋदित्।) ऋ, अचिचेलत्। इति दुर्गादासः॥

चेलं, क्ली, (चेल्यते विस्तार्य्यते तन्तुभिरिति। चेल चाले + कर्म्मणि घञ्। यद्वा चिल्यते परिधीयते यत् इति। चिल + कर्म्मणि घञ्।) वस्त्रम्। (यथा, मनुः। ११। १६६।

"चेलचर्म्मामिषाणाञ्च त्रिरात्रं स्यादभोजनम्॥")

अधमे त्रि। इत्यमरः। ३। ३। २०१॥

चेलानः, पुं, (चेल + आनच्।) फललताविशेषः। चेलना इति भाषा॥ तत्पर्य्यायः। अल्पप्रमाणकः २। इति रत्नमाला॥ अस्य फलस्य गुणाः। गुरुत्वम्। विष्टम्भित्वम्। मधुरत्वम्। कफवायुकारित्वञ्च। इति राजवल्लभः॥

चेलालः, पुं, (चेलमिव त्वचं आलाति। आ + ला + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) फललताविशेषः। तत्पर्य्यायः। चित्रफलः २ सुखाशः ३ राजतेमिषः ४ लतापनसः ५ नाटाम्रः ६ सेड्डुः ७। इति त्रिकाण्डशेषः॥

चेलिका, स्त्री, (चिल्यते परिधीयतेऽसौ इति। चिल + इन्। स्वार्थे कन् ततष्टाप्।) पट्टवस्त्रविशेषः। चेलिरकापड़ इति भाषा॥ यथा,—

"सेयं कृष्णस्य वनिता पीतशाटीपरिच्छदा।
रक्तचेलिकया छन्ना शातकुम्भघनस्तनी॥"
इति पाद्मे पातालखण्डम्॥

चेलुकः, पुं, (चेलति बुद्धितत्त्वं गच्छति इति। चेल + उकः।) बुद्धभिक्षुशिष्यः। तत्पर्य्यायः। श्रामणेरः २ प्रव्रजितः ३ महापासकः ४ गोमी ५। इति त्रिकाण्डशेषः॥

चेल्ल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) लद्वयान्तः। ऋ, अचिचेल्लत्। अस्य ऋदनुबन्धः कुटतेः कुटादिपाठवन्निष्फलः वेदेशूच्चारणभेदार्थो वा। अयं केश्चिन्न मन्यते। इति दुर्गादासः॥

चेष्ट, ङ ईहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ईहो व्यापारः। ङ, चेष्टते पठितुं शिष्यः। इति दुर्गादासः॥

चेष्टकः, पुं, (चेष्टते इति। चेष्ट + ण्वुल्।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।

"पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्।
कान्तः क्रोड़े स्थितां नारीं बन्धोऽयं चेष्टको मतः॥"

चेष्टाकर्त्तरि त्रि॥

चेष्टा, स्त्री, (चेष्ट + भावे अङ् टाप् च।) कायिकव्यापारः। इति मुग्धबोधटीकायां दुर्गादासः॥ (यथा, मनुः। ७। ६७।

"आकारमिङ्गितं चेष्टां भृत्येषु च चिकीर्षितम्।"

"प्रवृत्तिरत्र चेष्टा ज्ञानेच्छा प्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाश्च यत्नवानात्माप्यनुमीयते॥" इति सिद्धान्तमुक्तावली। ५५॥)

चेष्टानाशः, पुं, (चेष्टायाः सृष्ट्यादेर्व्यापारस्य नाशो निवृत्तिरत्र।) प्रलयः। इति राजनिर्घण्टः॥

चेष्टितं, क्ली, (चेष्ट + भावे क्तः।) गतिः। चेष्टा। इति मेदिनी॥ (यथा, देवीभागवते।१।१५।१८।

"जलूकेव सदा नारी रुधिरं पिबतीति वै।
मूर्खस्तु न विजानाति मोहितो भावचेष्टितैः॥")

चैतन्यं, क्ली, (चेतन एवेति। स्वार्थे भावे वा ष्यञ्।) प्रकृतिः। इति राजनिर्घण्टः॥ चेतना॥ (यथा,

"चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते।
ज्ञानक्रिये जगत्कर्त्तरि दृश्येते चेतनाश्रये॥
नेष्यते वैशेषिकैः साङ्ख्यैश्चेति शेषः।" इति शब्दार्थचिन्तामणिः॥ तथाच, याज्ञवल्क्ये। ३। ८१।

"मनश्चैतन्ययुक्तोऽसौ नाड़ीस्नायुशिरायुतः।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि॥")

चैतन्यः, पुं, (चेतन एव। स्वार्थे ष्यञ्।) भगवदवतारविशेषः। तस्य प्रमाणं यथा,—

"श्रुत्वा तु कलिधर्म्मांस्तान् ब्रह्मा लोकपितामहः।
सर्व्वलोकहितार्थाय प्रोवाच मधुसूदनम्॥
भविष्यति कलौ केनोपायेन धर्म्मपालनम्।
भक्तिमार्गस्थितिः कस्मात्तद्वदस्व जगद्गुरो!॥
श्रीभगवानुवाच।
अवतीर्णो भविष्यामि कलौ निजगणैः सह।
शचीगर्भे नवद्वीपे स्वर्धुनीपरिवारिते॥
अप्रकाश्यमिदं गुह्यं न प्रकाश्यं बहिर्मुखे।
भक्तावतारं भक्ताख्यं भक्तं भक्तिप्रदं स्वयम्॥
मन्मायामोहिताः केचिन्न ज्ञास्यन्ति बहिर्म्मुखाः।
ज्ञास्यन्ति मद्भक्तियुताः साधवो न्यासिनोऽमलाः॥
कृष्णावतारकाले याः स्त्रियो ये पुरुषाः प्रियाः।
कलौ तेऽवतरिष्यन्ति श्रीदामसुवलादयः॥
चतुःषष्टिर्महान्तस्ते गोपा द्वादश बालकाः।
धर्म्मसंस्थापनार्थाय विहरिष्यामि तैरहम्॥
काले नष्टं भक्तिपथं स्थापयिष्याम्यहं पुनः।
कृष्णश्चैतन्यगौराङ्गो गौरचन्द्रो गौरहरिः॥
शचीसुतः प्रभुर्गौरो नामानि भक्तिदानि मे।
गच्छन्तु भुवि ते पुत्त्रा जायन्तां भक्तरूपिणः॥
धर्म्मसंस्थापनं काले कुर्व्वन्तु ते ममाज्ञया।
कृष्णावतारकाले ये मद्भक्तास्तान् शृणु क्रमात्॥
श्रीदामनामगोपालो मम रामस्य च प्रियः।
अभिराम इति ख्यातः पृथिव्यां स भविष्यति॥
सुदामनामगोपालः श्रीमान् सुन्दरठक्कुरः।
वसुदामप्रियसखः श्रीधनञ्जयपण्डितः॥
सुवलो मे प्रियसखो गौरीदासाख्यपण्डितः।
कमलाकरपिप्पलाइः पूर्व्वख्यातो महावलः॥
महाबाहुर्गोपबालः श्रीमान् साहसपण्डितः॥
पुरुषोत्तमो वैश्यकुले स्तोककृष्णः प्रियो मम।
अर्ज्जुनः पूर्व्वदेहे यः कलौ श्रीपरमेश्वरः॥
पूर्व्वप्रियो लवङ्गो मे कृष्णाख्यः स कलौ युगे।
श्रीधरः श्रीधरसमः पूर्व्वं श्रीमधुमङ्गलः॥
सुवलो वलरामसखः कलौ श्रीलहलायुधः।
द्वादशैते भविष्यन्ति कलौ मद्धर्म्मरक्षणे॥
चतुःषष्टिर्महान्तो ये स्त्रियः केचिच्च पूरुषाः।
पुरा गोपाङ्गनाः ख्याताः कलौ ताः पुरुषा भुवि॥
यतिर्यस्मात् कलौ चाहं तदर्थं पुरुषाः स्त्रियः।
नीलाम्बरश्चक्रवर्त्ती गर्गः ख्यातो मुनिः पुरा॥
अतिप्रिया राधिका मे श्रीगदाधरपण्डितः।
राधिकायाः प्रियांशः स श्रीगदाधरठक्कुरः॥
मधुमती प्रियसखी श्रीनरहरिसंज्ञकः।
वृन्दा देवी प्राणसखी श्रीमुकुन्दः कलौ युगे॥
चन्द्रावली प्राणतुल्या कविराजः सदाशिवः।
ललिता या सखी मुख्या जगदानन्दपण्डितः॥
विशाखा या प्रियसखी श्रीदामोदरनामकः।
वनमाली कविराजः श्रीविशाखा सखी मम॥
श्रीरघुनाथभट्टश्च रङ्गदेवी मम प्रिया।
श्रीगदाधरभट्टस्तु सुदेवी सा मम प्रिया॥
प्रबोधानन्दविख्यातस्तुङ्गविद्या तथा प्रिया।
श्रीलराघवगोस्वामी चम्पकाख्या लता प्रिया॥